# ShaThtrinshattattva sandohaH

# ષટ્ત્રિંશત્તત્ત્વ સન્દોહઃ

## Document Information

Text title : ShaT.htri.nshattattva sandohaH with Sanskrit commentary

File name : shhattrim.itx

Category : vedanta, yoga, shiva

Location : doc_yoga

Author : Commentary by Rajananda

Transliterated by : Sorin Suciu aka SeSe at sorins at hotmail.com

Proofread by : Sorin Suciu aka SeSe at sorins at hotmail.com

Latest update : November 1, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ષટ્ત્રિંશત્તત્ત્વ સન્દોહઃ

યદયમનુત્તરમૂર્તિર્નિજેચ્છયાખિલમિદં જગત્સ્રષ્ટું ।
પસ્પન્દે સ સ્પન્દઃ પ્રથમશ્શિવતત્ત્વમુચ્યતે તજ્જ્ઞૈઃ ॥ ૧॥

ઇહ હિ સ્વતંત્રશિવાદ્વયદર્શને
પરમેશ્વરસ્સ્વતંત્રશ્ચિદ્ઘનસંવિત્સ્વભાવસ્સ્વયા
સ્વાતંત્ર્યાખ્યયા
શક્ત્યા સતતં શિવાદિધરણ્યન્તતત્તદ્ભુવનભૂતતત્ત્વાત્મના
ક્રીડનાદિશીલત્વાત્ કૃત્યપઞ્ચકવિધાયી વસ્તુતઃ
ક્રમરાહિત્યેઽપિ
વિશ્વસૃષ્ટૌ આભાસનમાત્રસારેણ
પારમાર્થિકકાર્યકારણભાવેન
ક્રમમપિ ઉદ્ભાવયન્ અનાખ્યત્વેઽપિ સ્વેચ્છયૈવ સ્વાત્મભિત્તૌ
તત્તચ્છિવાદિ
તત્ત્વાભિખ્યામવભાસયતિ । તથાત્વેઽપિ
ષટ્ત્રિંશત્તત્ત્વમયકુલસ્વરૂપપરામર્શનાતાખણ્ડ્યેન
સ્વચમત્કારવિમર્શસારામનુત્તર આનંદઘનાવસ્થાન્નોજ્ઝતીતિ
વાસ્તવાશયાવબોધનાય કશ્ચિંમહામાહેશ્વરઃ
પરમેશશક્તિપાતાનુગૃહીતઃ
તત્ત્વક્રમપ્રક્રિયામાર્યાભિરેકવિંશત્યા
સમુપનિબબન્ધ યદયમિત્યાદિના । અનુત્તરમૂર્તેભગવતઃ
પરમેશ્વરસ્ય
પ્રકાશઘનસ્વાત્મૈકાત્મ્યેનાવસ્થિતં વિશ્વં સિસૃક્ષોઃ
દર્પણનગરવત સ્વેચ્છયૈવ સ્વાત્મન્યાદ્યા
પ્રોંમિમીલયિષાવસ્થા
શિવતત્ત્વવ્યપદેશ્યા પઞ્ચશક્તિનિર્ભરત્વાત્સ્વાતંત્રિયાત્
ચિદાદિપ્રાધાન્યેન ક્રમશઃ શુદ્ધાધ્વનિ

તત્ત્વસૃષ્ટ્યવભાસનં
માયાવિદ્યાદેસ્ સંવિત્પ્રકાશઘનપરમશિવાત્
વ્યતિરેકાનતિરેકવિકલ્પૈરુપહતત્વાત્
સ્વતંત્રિયમેવ કેવલં વિશ્વોત્પત્તિસંહરણાદૌ
મૂર્ધાભિષિક્તં
તત્તદનન્તશક્તિનિયમાનાં ક્રોડીકારિત્વાત્ વક્ષ્યમાણેઽપિ
તત્તદ્રૂપોપગ્રહણે સ્વતંત્ર્યામુક્તત્વાન્ન
પ્રાચ્યસ્વભાવાપાયઃ ॥ ૧॥

ઇચ્છા સૈવસ્વચ્છા સંતતસમવાયિની સતી શક્તિઃ ।
સચરાચરસ્ય જગતો બીજં નિખિલસ્ય નિજનિલીનસ્ય ॥ ૨॥

તસ્ય સ્વાભિન્ના સ્વતંત્રેચ્છાશક્તિરેવોદ્ભવિષ્યતો વિશ્વસ્ય
સ્વાંતર્નિલીનત્વાત્બીજભૂતા શક્તિતત્ત્વતાં
યાતિ શક્તેશ્શક્તિમદ્ધર્મત્વેઽપિ
નાંયદર્શનાભિમતવત્તસ્માત્વ્યતિરેકઃ
નૈષ્કર્મ્યેણાત્રેચ્છાયાસ્સ્વચ્છત્વાત્
હૃદયસારોર્મિપ્રભૃતિભિઃ સંજ્ઞાભિ તત્તદ્દર્શનેષુ અભિધાનં ।
પરમેશ્વર એવ હિ સ્વૈશ્વર્યોચ્છલત્તયા
પૂર્ણાહન્તાચમત્કારતારતમ્યેન
શક્તિદર્શામધિશેતે ઇત્યત્રાનન્દશક્તિપ્રાધાન્યં ॥ ૨॥

સ્વેચ્છાશક્ત્યુદ્ગીર્ણં જગદાત્મતયા સમાચ્છાદ્ય ।
નિવસન્સ એવ નિખિલાનુગ્રહનિરતસ્સદાશિવોઽમિહિતઃ ॥ ૩॥

તસ્યૈવ પરમેશ્વરસ્ય સ્વસ્વાતન્ત્ર્યોદ્ભાસિતસ્ય વિશ્વસ્ય
વિશુદ્ધસંવિન્માત્રાધિકરણ્યેન સ્વાત્મન્યેવ
સમુલ્લાસનાત્સદિત્યાખ્યાનાત્સદાશિવતત્ત્વાવસ્થાતસ્સ
ભાવિનસ્સમસ્તભાવરાશેસ્સમ્યક્
બહિરવબિભાસયિષાલક્ષણક્રીડારસિકત્વાતનુગ્રહનિરતતદ્ભૂમિકાં
ગૃહ્ણાતીત્યતો નિવસન્નિત્યુક્તં ॥ ૩॥

વિશ્વં પશ્ચાત્પશ્યન્ ઇદન્તયા નિખિલમીશ્વરો જાતઃ ।
સા ભવતિ શુદ્ધવિદ્યા યેદન્તાહન્તયોરભેદમતિઃ ॥ ૪॥

એવં ક્રમાવભાસનાત્વિશ્વસ્ય શુદ્ધસંવિન્માત્રાધિકરણ

એવ સ્ફુટતયા પરામૃશ્યમાનસ્યાહમંશે
અભિષેચનાત્સ એવ પરમેશ્વર ઈશ્વરતત્ત્વદશામધિશ્રયત્યત્ર
વેદ્યજાતસ્ય સ્ફુટાવભાસનાજ્ઞ્ઞાનશક્ત્યુદ્રેકઃ ।
આન્તરદશાય ઉદ્રિક્તત્વાત્સદાશિવાવસ્થા
બર્હિભાવપરતોદ્રેકાત્ તુ ઈશ્વરાવસ્થા ઇત્યનયોર્વિશેષઃ ।
પ્રરૂઢભેદસ્ય ઇદન્તાંશસ્ય
સમધૃતતુલાપુટન્યાયેનાહમંશસ્ફુરણાયાં
શુદ્ધવિદ્યાતત્ત્વં ।
અત્ર વિશ્વસ્ય સ્ફુટતરં પરામર્શનાત્ક્રિયાશક્તિઃ પ્રધાના ।
ઇયતિ ચ શુદ્ધસ્વાતંત્ર્યમેવ તત્તદ્વૈચિત્ર્યેણ પ્રસ્ફુરતીતિ
શુદ્ધોધ્વા ॥ ૪॥

માયા વિભેદ બુદ્ધિર્નિજાંશજાતેષુ નિખિલજીવેષુ ।
નિત્યં તસ્ય નિરઙ્કુશવિભવં વેલેવ વારિધે રુન્ધે ॥ ૫॥

અશુદ્ધે પુનરધ્વનિ પરમેશ્વરૈવ
સ્વાત્મપ્રચ્છાદનસામક્રીષયાઘોરભટ્ટારકભૂમિં
મન્ત્રમહેશ્વરરૂપાં ગૃહીત્વા દુર્ઘટસમ્પાદનસામર્થ્યેન
માયાશક્ત્યા સ્વતોઽન્યોન્યતશ્ચ ભિન્નમણુનાં ભોગસિદ્ધયે
કલાદિક્ષિત્યન્તં જડાજડવર્ગં ક્રમતોઽક્રમતોઽપ્યવભાસયતિ
તત્ર ભિન્નભિન્નપ્રથાત્મકમયીયમલેન સ્વાઙ્ગકલ્પેષ્વપિ
જડવેદ્યવર્ગેષુ વિભિન્નતયા બુદ્ધિરેવ માયાખ્યં તત્ત્વં યેન
તસ્ય
નિરર્ગલં સ્વાતંત્ર્યં પ્રતિહંયતે વેલયેવાબ્ધિતરઙ્ગાણાં
વૈભવં ॥ ૫॥

સ તયા પરિમિતમૂર્તિસ્સઙ્કુચિતસમસ્તશક્તિરેષ પુમાન્ ।
રવિરિવ સંધ્યારક્તસ્સંહૃતશક્તિસ્સ્વભાસનેઽપ્યપટુઃ ॥ ૬॥

અવિકાર્યસ્યાપિ તસ્ય ચિદાત્મનઃ સ્વશક્તીનાં
સઙ્કોચનપુરઃ સરં શક્તિદારિદ્યમાપન્નસ્યાણવપર
પર્યાયા પુરુષસંજ્ઞા સંહૃતશક્તિત્વેન પરિમિતાત્મા
સ સ્વાત્મૈશ્વર્યામપિ પ્રત્યભિજ્ઞાતુમપટુઃ સઞ્ચરતિ
વિભિન્નયોનિષુ ।

યદા
પુનશ્શક્તિપાતતારતંયાત્વિજ્ઞાપિતૈશ્વર્યસ્સ્વાઙ્ગકલ્પમેવ
વિશ્વં પ્રત્યભિજાનીયાત્ તદા જીવત્ શિવભાવં પ્રત્યાપદ્યતે ॥ ૬॥

સમ્પૂર્ણકર્તૃતાદ્યા બહ્વ્યસ્સન્ત્યસ્ય શક્તયસ્તસ્ય ।
સઙ્કોચાત્સઙ્કુચિતાઃ કલાદિરૂપેણ રૂઢયન્ત્યેવં ॥ ૭॥

શત્તયન્તરઙ્ક્રોડીકારિણ્યા સ્વાતન્ત્રશક્ત્યાવિયુક્તત્વાદેવ
પરમેશ્વરસ્ય બહુશક્તિત્વં સઙ્કોચગ્રહણાદેવ
સર્વાસ્તચ્છક્તયસ્સઙ્કુચિતીભૂય કલાદિતત્ત્વપઞ્ચકેન
પ્રરોહમુપગચ્છન્તી । તા યથા
સર્તા સર્વજ્ઞતા તૃપ્તિઃ નિત્યતા સ્વાતન્ત્ર્યમિત્યેતત્પઞ્ચકં
શુદ્ધાશુદ્ધભેદેન દ્વિધા પરમેશવિષયતયા શુદ્ધં
સંસારવિષયતયા તુ અશુદ્ધં ॥ ૭॥

તત્સર્વકર્તૃતા સા સઙ્કુચિતા કતિપયાર્થમાત્રપરા ।
કિઞ્ચિત્કર્તારમમું કલયન્તિ કીર્ત્યતે કલા નામ ॥ ૮॥

ગોપિતસ્વરૂપત્વાન્નિરુદ્ધશક્તેઃ પરમેશ્વરસ્ય
સર્વકર્તૃતાશક્તિઃ પ્રાણાદિપરિમિતપ્રમાતૃભાવે કિઞ્ચિત્
કર્તૃતોદ્વલનાત્મના કલનેન કલાતત્ત્વાત્મતાં યાતિ
યદ્વશાત્કિઞ્ચિદેવ કર્તુમુત્સહતે અણુઃ ન સર્વત્ર કર્તૃત્વમિતિ ॥ ૮॥

સર્વજ્ઞતાસ્ય શક્તિઃ પરિમિતતનુરલ્પવેદ્યમાત્રપરા ।
જ્ઞાનમુત્પાદયન્તી વિદ્યેતિ નિગદ્યતે બુધૈરાદ્યૈઃ ॥ ૯॥

એવં તસ્યૈવ સર્વજ્ઞતાશક્તિસ્સઙ્કોચં ગૃહીતવતી
કિઞ્ચિજ્જ્ઞેયમાત્રપરત્વેન જ્ઞાનોત્પાદનાત્વિદ્યાતત્ત્વં
વિદ્યયૈવ બુદ્ધિદર્પણે પ્રતિફલિતા ભાવા વિવિચ્યંતે
ગુણસઙ્કીર્ણનતયા તસ્ય વિવેક્તુમક્ષમત્વાત્તસ્માત્
વિદ્યયૈવાર્થવિવેકઃ ॥ ૯॥

નિત્યપરિપૂર્ણતૃપ્તિઃ શક્તિસ્તસ્યૈવ પરમિતા તુ સતી ।
ભોગેષુ રજ્જયન્તી સતતમમું રાગતત્ત્વતાં યાતા ॥ ૧૦॥

પરમેશ્વરસ્ય નિત્યપરિપૂર્ણતૃપ્તિર્નામ શક્તિઃ પારમિત્ય
યાતા યત્ર ક્વચન ઉપાદેયાદ્યભિમતે

કિઞ્ચન્મે ભૂયાત્ ઇતિ સામાન્યેન અભિષ્વઙ્ગમાત્રાદાપદ્યતે
રાગતત્ત્વં ।
વિશેષાભિષ્વઙ્ગસ્તુ અસ્યૈવ પલ્લવિતપ્રાયેત્યેતદેવ કલાવિદ્યયોઃ
પ્રાગુક્તયોઃ કિઞ્ચિદ્ભાગે નિમિત્તં ॥ ૧૦॥

સા નિત્યતાસ્ય શક્તિર્નિકૃષ્ય નિધનોદયપ્રદાનેન ।
નિયતપરિચ્છેદકરી ક્લૃપ્તા સ્યાત્કાલતત્ત્વરૂપેણ ॥ ૧૧॥

અકાલકલિતસ્ય ચિદાત્મનો નિત્યત્વાખ્યા
શક્તિન્યગ્ભાવમાશ્રિત્ય કાર્યારૂષિતકર્તૃત્વકલનય
આણું તુટ્યાદિક્રમાભાસનાત્મના કાલેન સંયોજ્ય
કાલતત્ત્વવ્યપદેશ્યા કલ્પ્યતે યેનાયમણુઃ
ભૂતાદિક્રિયાક્રમકલિતઃ
કાલવશતામપદ્યતે ॥ ૧૧॥

યાસ્ય સ્વતન્ત્રતાખ્યા શક્તિસ્સઙ્કોચશાલિની સૈવ ।
કૃત્યાકૃત્યેષ્વવશં નિયતમમું નિયમન્ત્યભૂન્નિયતિઃ ॥ ૧૨॥

સ્વતંત્ર્યમેવાસ્ય પરપ્રમાતુસ્સઙ્કુચન્નિયતિતત્ત્વ તામાભાસયતિ
યતઃ કાર્યાકાર્યેષુ નિયમાધાનાત્
વિશિષ્ટે કાર્યે વિશિષ્ટં કારણં એવાદધ્યાન્ નાનિયતં ઇતિ ।
એતેન કલાદિના કઞ્ચુકેના વૃતોઽયં શક્તિદારિદ્ર્યમનુભૂય
કલાદિ
મુખેનૈવ સ્વવૈભવાત્ પ્રતિવિતીર્ણકિઞ્ચિદંશઃ પશુરિત્યુચ્યતે ॥ ૧૨॥

ઇચ્છાદિત્રિસમષ્ટિશ્શક્તિશ્શાન્તાસ્ય સઙ્કુચદ્રૂપા ।
સઙ્કુલિતેચ્છાદ્યાત્યકસત્ત્વાદિક સામ્યરૂપિણી તુ સતી ॥ ૧૩॥

બુદ્ધ્યાદિસામરસ્યસ્વરૂપચિત્તાત્મિકા ગતા પ્રકૃતિઃ ।
ઇચ્છાસ્ય રજોરૂપાહઙ્કૃતિરાસીદહં પ્રતીતિકરી ॥ ૧૪॥

અસ્ય શાન્તાખ્યાશક્તિરક્ષુબ્ધત્વાતિચ્છાદીનાં
શક્તીનાં ગર્ભીકરણાત્સમષ્ટિરૂપા પારમિત્યગ્રહણાચ્ચ
ગુણાનામવિભાગાવસ્થા પ્રકૃતિતત્ત્વં ।
ગુણાનામિચ્છાદિશક્તિત્રિકેનાન્વારબ્ધત્વાત્ત્રિત્વં યત્પ્રક્ષોભાત્
પ્રકૃતિકસર્ગસ્ય પ્રસરઃ । તત્ર ચિત્તાત્મકે બુદ્ધ્યકૃન્મનાંસિ
સમ્યાવસ્થામધિશ્રિયન્તિ । અત્ર તત્ત્વક્રમપ્રસરે

શિવાદિસકલાન્તેષુ
પ્રભાતૃવર્ગેષુ જ્ઞાનક્રિયાશક્તી એવ મુખ્યમુપકરણં તે એવ
સઙ્કુચિદ્રૂપે ઈશ્વરશુદ્ધવિદ્યે સઙ્કુચિતે વિદ્યાકલે
અત્યન્તસઙ્કુચિતે
બુદ્ધિકર્મેન્દ્રિયાણિ ક્રિયાયાઃ સઙ્કોચસીમ્નિ ભૂતસૂક્ષ્માદિ ઇતિ
વિજ્ઞેયં । અણોઃ રજઃ પરિણામિની ઇચ્છશક્તિ
અહમિત્યાભિમાનલક્ષણા અહઙ્કૃતિઃ ॥ ૧૩-૧૪॥

જ્ઞાનાપિ સત્ત્વરૂપા નિર્ણયબોધસ્ય કારણં બુદ્ધિઃ ।
તસ્ય ક્રિયા તમોમયમૂર્તિર્મનોચ્યતે વિકલ્પકરી ॥ ૧૫॥

સત્ત્વપરિણામિની જ્ઞાનશક્તિરેવાર્થાધ્યવસાયલક્ષણા
બુદ્ધિઃ । તમઃ પરિણામિની ક્રિયાશક્તિઃ ।
વિકલ્પકરણલક્ષણં
મનસ્તત્ત્વમુચ્યતે ॥ ૧૫॥

વામાદિપઞ્ચભેદસ્સૈવ સઙ્કુચિતવિગ્રહો દેવઃ ।
જ્ઞાનક્રિયોપરાગપ્રાધાન્યાદ્વિવિધવિષરૂપોઽભૂત્ ॥ ૧૬॥

સૈવ ક્રીડાસતત્ત્વો વામોદેવાદિપઞ્ચમૂર્તિતત્ત્વાત્ સઙ્કુચિતો
ભૂત્વા જ્ઞાનશક્ત્યુપરઞ્જનપ્રધાનતયા
જ્ઞાનેન્દ્રિયતદ્વિષયશરીરતાં ક્રિયાશક્ત્યુપાધિપ્રાધાન્યાત્
કર્મેન્દ્રિયવ્યાપારવત્ત્વં ચ ઉપાદત્તે । શક્તિપઞ્ચકોપાદાનાત્
કરણાનાં પઞ્ચધાત્વં બોધ્યં ॥ ૧૬॥

શ્રોત્રં ચક્ષુસ્સ્પર્શનજિહ્વાઘ્રાણાનિ બોધકરણાનિ ।
શદ્ધસ્પર્શરૂપરસગન્ધૌ ચેતિ ભૂતસુક્ષ્માણિ ॥ ૧૭॥

શ્રોત્રાદીનિ જ્ઞાનેન્દ્રિયાણિ શબ્દાદીનિ તન્માત્રાણિ ॥ ૧૭॥

અયમેવાતિનિકૃષ્ટો જાતો ભૂતાત્મનાપિ ભૂતેશઃ ।
ગગનમનિલશ્ચ તેજસ્સલિલં ભૂમિશ્ચ પઞ્ચભૂતાનિ ॥ ૧૮॥

અત્યન્તસઙ્કોચગ્રહણાતચિદ્રૂપતામવભાસ્યાકાશદીનિ
પઞ્ચભૂતાનિ ॥ ૧૮॥

શ્રોત્રાદિકરણવેદ્યાશ્શબ્દાદ્યાસ્તાનિ વેદકાન્યેષાં ।
વચનકરી વાગાસીત્ પાણિસ્સ્યાત્કરણભૂતાદાને ॥ ૧૯॥

શબ્દાદિજ્ઞાનસાધનાનિ શ્રોત્રાદિકરણાનિ
વચનાદિક્રિયાસાધનાનિ
વાગાદીનિ કર્મેંદ્રિયાણિ ॥ ૧૯॥

ગમનવિસર્ગાનન્દત્રિતયે પાદાદિકં કરણં ।
ગન્ધવતી ભૂમિસ્સ્યાદાપસ્સાંસિદ્ધિકદ્રવાસ્તેજઃ ॥ ૨૦॥

ઉષ્ણસ્પર્શમરૂપસ્પર્શો વાયુરમ્બરં સશબ્દં ।
ષટ્ત્રિંશત્તત્ત્વમયં વન્દે કુલાતિગં શંભું ॥ ૨૧॥

આદિના પાયૂપસ્થૌ ગૃહ્યેતે । ગંધવત્ત્વં ભૂમેર્લક્ષણં
સાંસિદ્ધિકદ્રવત્વમબ્લક્ષણમુષ્ણ સ્પર્શેન તેજો
લક્ષ્યતે અરૂપસ્પર્શો વાયુલક્ષણં શબ્દાકશસ્યેતિ પ્રત્યેકં
મુખ્યગુણનિર્દેશઃ । તત્ત્વાનામુત્તરોત્તરં વ્યાપ્યવ્યાપકભાવેન
ભૂમિર્વ્યાપ્યા જલાદિશિવાન્તં વ્યાપકાનિ પઞ્ચત્રિંશતેવં
ભૂતસૃષ્ટૌ વ્યોમાદિગુણા વ્યામકત્વેનાનુગતાસ્સંતિ ।
પરમશિવતત્ત્વસ્ય
સર્વત્રાનુગતત્વાત્વિશ્વમયતદુત્તીર્ણયામલકૌલસ્વરૂપમેવ
ભક્તાનામિતિ વન્દનોપસંહારોઽયયોપક્ષિપ્તમિતિ શિવં ॥ ૨૦ - ૨૧॥

॥ ઇતિ ષટ્ત્રિશત્તત્ત્વસંદોહશ્રીમદ્રાજાનકાનન્દાચાર્યવિરચિતવિવરણોપેતઃ સમાપ્તઃ ॥

Encoded and proofread by Sorin Suciu aka SeSe at sorins at hotmail.com.

*ShaThtrinshattattva sandohaH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*